श्रीः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

श्रीमदान्ध्रपूर्णार्यविरचितम्

# ॥ श्रीयतिराजवैभवम् ॥

*This document[*] has been prepared by*

***Sunder Kidambi***

*with the blessings of*

**श्री रङ्गरामानुज महादेशिकन्**

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

[*] This was typeset using LaTeX and the **skt** font.

श्रीः

श्रीमते रामानुजाय नमः

# ॥ श्रीयतिराजवैभवम् ॥

श्रीरामानुजयोगीन्द्रक्षीरकैङ्कर्यशालिने।
नमः स्यादान्ध्रपूर्णाय महनीयगुणाय ते॥

श्रीमद्यामुनदेशिकादधिगतश्रुत्यन्तयुग्माशयः
तत्सन्देशचिकीर्षया नियतधीः श्रीशैलपूर्णो गुरुः।
अन्विष्यन् अनुजाद्वयोचितवरौ श्रीवेङ्कटाद्रौ हरेः
तीर्थं पुष्पमपीतराण्युपहरन्नास्ते स्म सद्वृद्धये॥ १ ॥

तत्रान्तरे मधुरमङ्गलभूतपुर्योर्नित्यस्थिती श्रुतितदङ्गविदौ कुलीनौ।
द्वावम्बुरुण्णयनकेशवसोमयाजिनामान्वितावभजतां परिणेतुकामौ॥ २ ॥

श्रीशैलपूर्णस्स समीक्ष्य वर्यौ वरौ विनिश्चित्य च तौ प्रहृष्टः।
तत्प्रार्थितश्शङ्खरथाङ्गचिह्नमन्त्रप्रदोऽभून्नतयोस्तयोश्च॥ ३ ॥

तामग्रहीदग्रजभूमिदेवीं हृष्यन्मनाः केशवसोमयाजी।
तां चानुजातां कमलाक्षभट्टः श्रीदेविकां तौ च तुतोष पूर्णः॥ ४ ॥

ततस्सभार्यौ तदनुज्ञया तौ स्वं वासमागम्य चिरं सुशीलौ।
श्रीशं समाराध्य तदीयभक्तौ सह प्रियाभ्यां मुदितावभूताम्॥ ५ ॥

ततो जगन्मङ्गलपिङ्गलाब्दे चैत्राग्र्यशुक्लच्छदपञ्चमीके।
आर्द्राभिधर्क्षेण युते च वारे बृहस्पतेस्सन्मृगराजलग्ने॥ ६ ॥

वेदान्तसिद्धान्तसमर्थनाय बाह्यान्तरभ्रान्तमतापनुत्त्यै।
शेषांशकः केशवयज्वदेव्यां तेजोनिधिः कश्चिदिहाविरासीत्॥ ७ ॥

श्रीशैलपूर्णोऽप्यथ भूतपुर्यामागम्य वीक्ष्याद्भुतभागिनेयम्।
चकार रक्षार्थरथाङ्गशङ्खचिह्नं च रामानुजनामकं च॥ ८ ॥

www.prapatti.com

ततोऽभिवृद्धस्य च तत्कटाक्षैः पितापि तस्यात्मभुवोऽब्दपूर्तिम्।
चौलं तथाऽरम्भणमक्षराणां चकार सत्त्वोत्तरपञ्चमाब्दे॥ ९ ॥

कृतोपनीतिस्तु ततस्स्वपित्रा समभ्यसन् वेदतदङ्गशास्त्रम्।
रामानुजार्योऽभवदग्र्यतेजा महर्धिरानन्दितसत्यशीलः॥ १० ॥

ततस्तु काञ्चित् परिणीय कन्यां गृहस्थधर्मस्थितिराप काञ्च्याम्।
स पूर्वपक्षाभ्यसनाय मायिसन्न्यासिनं यादवसम्प्रकाशम्॥ ११ ॥

ततः कदाचिद्धुरि यादवेन सर्वं खलु श्रुत्यविशारदेन।
अपार्थ उक्ते स यथार्थमुक्त्वा रामानुजोऽदर्शयदर्थसारम्॥ १२ ॥

श्रीरङ्गवासी स तु यामुनार्यो निशम्य रामानुजदर्शितार्थम्।
आगम्य काञ्च्यां वरदं महात्मा देव्या युतं प्राणमदन्तरङ्गैः॥ १३ ॥

ततस्स शिष्यावृतयादवं तं रामानुजं मध्यगतं च भान्तम्।
समीक्ष्य रामानुजशिष्य एष चेद्यादवो युक्तमितीव दध्यौ॥ १४ ॥

श्रीवैष्णवद्धर्यर्थमतीव भक्त्या तस्य प्रसीदेति स यामुनार्यः।
भान्तं महादेविकया शरण्यं श्रीदेवराजं शरणं प्रपन्नः॥ १५ ॥

सम्भाषितश्चेदिह पाठभङ्गः स्यादित्यसम्भाष्य स यामुनार्यः।
श्रीरङ्गमेवाप सशिष्यवर्गो रामानुजार्यश्च पपाठ पश्चात्॥ १६ ॥

तद्देशभूपस्य सुते पिशाचग्रस्तेऽन्यमन्त्रैरखिलैरसाध्ये।
भूपस्तदा यादवमन्त्रमोच्य इत्येवमाकर्ण्य तमानिनाय॥ १७ ॥

दृष्टान्तरङ्गावृतयादवं तं स्मित्वा पिशाचः परिभाव्य भूरि।
रामानुजार्यं शरणं प्रपद्य राजात्मजं स्वं च जहौ महाघम्॥ १८ ॥

तद्वृत्तमत्यद्भुतमीक्ष्य भूपो रामानुजार्येकृत सन्मतिं सः।
तेनार्पितं तद्गुरुयादवाय सन्मानमत्यन्तविनीतिपूर्वम्॥ १९ ॥

गत्वा स काञ्चीमथ यादवोऽपि रामानुजे प्रीत इवान्तरेर्ष्यः।
तदादि तन्मानसशोधनेच्छुः वेदान्तवाक्यार्थविचारकोऽभूत्॥ २० ॥

कप्यासशब्दस्य वदत्यपार्थं तस्मिन् तदभ्यङ्गकृतः कदाचित्।
रामानुजस्याश्रु तदूरुदाहि दृष्ट्वाशु सोऽप्युन्मुखसम्भ्रमोऽभूत्॥ २१॥

इदं किमित्युक्तवतेऽथ तस्मै कप्यासवाक्यस्य यथार्थमुक्त्वा।
जैमिन्युपाख्यानमपि ब्रुवन्तं रामानुजं नात्र पठेत्यवोचत्॥ २२॥

ततस्समालोच्य सहान्तरङ्गैः प्रलोभ्य रामानुजमप्युपायैः।
स जाह्नवीस्नाननिमित्तयात्राव्याजेन हन्तुं कुमतिः प्रतस्थे॥ २३॥

गोविन्दभट्टश्च सुतोऽथ मातृष्वसुः सुशीलस्सहपाठि मित्रम्।
मध्येवनं प्रोच्य स दुष्टचिन्तां रामानुजाय स्वयमन्वगात् तम्॥ २४॥

महाटवीमध्यगतस्स रात्रौ रामानुजोऽचिन्तयदार्तचेताः।
देव्या महत्या सह भासमानं दीनानवन्तं वरदं शरण्यम्॥ २५॥

किरातरूपी वरदोऽथ देव्या गच्छेम रामानुज साधु काञ्चीम्।
इत्यग्रगामी प्रियया स पीत्वा तद्दत्तकूपोदकमन्तरासीत्॥ २६॥

दृष्ट्वा प्रभातेऽथ स पुण्यकोटीविमानमत्यन्तसमीपवृत्ति।
पीतोदकं तं वरदं विचिन्त्य रामानुजार्योऽप्यतिविस्मितोऽभूत्॥ २७॥

सन्ध्यामुपास्यान्तिकसत्तटाके संसेव्य देवीं वरदं च हृष्टः।
नित्यं तदङ्गीकृतकूपतीर्थैः रामानुजार्यस्तमतोषयच्च॥ २८॥

गङ्गातटाद्यादवमन्त्रवश्यो गोविन्दभट्टः स्वकरस्थलिङ्गः।
स्वग्राममागम्य च कालहस्तिन्यवास्त तत्स्थानविचारकस्सन्॥ २९॥

काञ्च्यामथागम्य स यादवोऽपि रामानुजं वीक्ष्य तदागमं च।
श्रुत्वा समाहूय विलोभयंस्तं ततस्स्वशिष्यैस्समपाठयच्च॥ ३०॥

विरुद्धमर्थं तु कदाचिदुक्तं सदेव सोम्येदमिति श्रुतेश्च।
अशिक्षयत्सङ्गतमर्थमुक्त्वा रामानुजार्योऽथ तमत्यजत्सः॥ ३१॥

त्यक्तस्सदा यादवमर्कटेन रामानुजार्यो मणिरद्भुतश्रीः।
हृद्यः करीशस्य हरेरभूदित्याकर्ण्य हृष्टस्स च यामुनार्यः॥ ३२॥

रामानुजार्यनयनाय सोऽपि शिष्यं महापूर्णमथादिदेश।
गत्वाऽथ काञ्चीं स च तोषयित्वा तं स्तोत्ररत्नेन तुतोष भूयः॥ ३३ ॥

रामानुजार्योऽपि स यामुनार्यं संसेवितुं रङ्गपुरीं गमिष्यन्।
प्राज्यं महापूर्णयुतः कवेरकन्यातटे सूरिगणं ददर्श॥ ३४ ॥

रङ्गेशमुख्या अपि सूरयस्तौ दृष्ट्वा महापूर्णयुताय तस्मै।
रामानुजार्याय निवेद्य शान्ताः श्रीयामुनार्याङ्गुलिमुद्रणं च॥ ३५ ॥

तद्व्याससूत्रं विवरीकरिष्ये तत्तातनामापि शठारिनाम।
युक्तं विधास्याम्युभयोरितीर्य रामानुजोऽवन्दत तत्पदाब्जे॥ ३६ ॥

क्षणेन तस्याङ्गुलयश्च तिस्रः पुरेव भूतास्तदुदीक्ष्य सर्वे।
सिद्धान्तनिर्धारणसार्वभौमस्सत्यं भविष्यत्ययमित्यवोचन्॥ ३७ ॥

त्वरन्नसंसेव्य स रङ्गनाथमागम्य काञ्चीं वरदं प्रणम्य।
तीर्थादिकैङ्कर्यकरः कदाचित् किं वाद्य कर्तव्यमितीव दध्यौ॥ ३८ ॥

तत्रत्यपूर्णं वरदान्तरङ्गं वर्णाश्रमाचारविधायकं तम्।
सम्प्रार्थयच्चित्तगतं ममार्थं ज्ञात्वा करीशाद्वद देशिकेति॥ ३९ ॥

श्रीमान् परं तत्त्वमहं मतं मे भेदः प्रपत्तिर्निरपायहेतुः।
नावश्यकी च स्मृतिरन्त्यकाले मोक्षो महापूर्ण इहार्यवर्यः॥ ४० ॥

इत्यर्थषट्कं वरदोपदिष्टं रामानुजार्याय स चाथ पूर्णः।
रहस्यवादीत्स रहस्यवादी तस्माद्धि रामानुजमान्यनामा॥ ४१ ॥

रामानुजार्योऽपि पुरं गमिष्यन् रङ्गं ततः श्रीमधुरान्तकस्थम्।
श्रीभूमिनीळादियुतं तटाकपालं सिषेवे रघुनन्दनं तम्॥ ४२ ॥

सतीर्थ्यसन्देशत आपतन्तं दिष्ट्या महापूर्णमुदीक्ष्य तत्र।
तत्पादपद्मे प्रणिपत्य हर्षाद्रामानुजार्यस्स च बाष्पपूर्णः॥ ४३ ॥

परस्परादेशविचारहर्षात्तत्सन्निधौ श्रीवकुलद्रुमस्य।
छायायुतं तत्परमं पदं च ध्यात्वा महापूर्णगुरुं स भेजे॥ ४४ ॥



www.prapatti.com

स शङ्खचक्राङ्कनपुण्ड्रयाग मन्त्रांस्तदर्थैरपि मन्त्ररत्नम्।
अन्यांश्च तत्रोपदिदेश मन्त्रान् रामानुजाचार्यवराय तस्मै॥ ४५॥

तादृङ्महावैभवदिव्यदेशात् काञ्चीमथागम्य गुरुस्सशिष्यः।
अन्वर्थनाम्ना वरदं प्रणम्य रामानुजार्यावसथं प्रपेदे॥ ४६॥

उपादिशत्स त्रिसहस्रगाथास्तद्व्याससूत्रार्थमपि प्रहृष्टः।
रामानुजार्यश्च गुरुं सदारमपूजयन्नित्यमभीष्टवृत्त्या॥ ४७॥

केनापि कार्येण ततः कदाचिद्रामानुजे भूतपुरं प्रयाते।
तत्पत्न्यधिक्षेपनिकर्षवाचा रुष्टां स्वदेवीं स चुकोप पूर्णः॥ ४८॥

पूर्णस्सदेव्याथ जगाम रङ्गं तच्चापि वृत्तं स निशम्य रुष्टः।
रामानुजार्यो गुरुभक्तिपूर्णः स्वदेविकां मातृगृहं निनाय॥ ४९॥

पत्नीं परित्यज्य स वीतरागः श्रीदेवराजं प्रणिपत्य तस्मात्।
तुर्याश्रमं स्वीकृतवान् ददौ स देवोऽपि तस्मै यतिराजनाम॥ ५०॥

ततस्त्रिदण्डी स शिखोपवीतकाषाययुक्तो मनुरत्नजापी।
वर्णाश्रमाचारपरश्चकाशे रामानुजार्यो यतिसार्वभौमः॥ ५१॥

तत्रैव कूराधिपवात्स्यनाथवाधूलनाथाश्च समाश्रितास्तम्।
तेभ्योऽपि रामानुजसंयमीन्द्रस्स शङ्खचक्राङ्करहस्यदोऽभूत्॥ ५२॥

ततोऽभवद्यादवसम्प्रकाशः श्रीयामुनाचार्यकटाक्षशुद्धः।
गोविन्दयोगी यतिराजशिष्यो ग्रन्थं स कञ्चिद्यतिधर्ममाह॥ ५३॥

श्रीरङ्गराजार्यवरः कदाचित् गत्वाथ काञ्चीं वरदं प्रणम्य।
आदाय रामानुजसंयमीद्रं श्रीरङ्गमेवाप्तुमथ प्रतस्थे॥ ५४॥

ततस्स कूरेशमुखान्तरङ्गैरन्यैश्च शिष्यैर्यतिराजवर्यः।
श्रीशं च नत्वा मधुरान्तकस्थं श्रीरङ्गमासाद्य सिसेविषुस्सन्॥ ५५॥

प्रत्युद्गतै रङ्गपतेर्नियोगात् सम्मानितो माल्यमुखैर्यतीशः।
श्रियं प्रणम्याथ च रङ्गनाथं श्रीकार्यनिर्वाहधुरन्धरोऽभूत्॥ ५६॥

विभूतियुग्माधिपताधिकं च सर्वं महापूर्णकटाक्षलब्धम्।
मत्वा स तत्पादसरोजयुग्मं संसेव्य तद्वश्यतयावतस्थे॥ ५७॥

ततो महापूर्णगुरोर्नियोगात्प्रणम्य गोष्ठीपुरपूर्णपादौ।
मन्त्रार्थतच्छ्लोकवरार्थशिक्षां प्राप्याथ सोऽशिक्षयदप्यनेकान्॥ ५८॥

ततस्स पूर्णोऽपि तदान्तरज्ञः सम्मानयंस्तं यतिसार्वभौमम्।
तद्दर्शनं चेदमितीव तुष्टः प्रोवाच यल्लक्ष्मणदर्शनं तत्॥ ५९॥

ततस्स रामानुजसंयमीन्द्रो गुरुं महापूर्णमवन्दताथ।
पुनश्च रङ्गेशगुरोर्गृहीतुं कांश्चिद्विशेषान् स तदादिदेश॥ ६०॥

ततश्शठारेश्चरमप्रबन्धं तदर्थसारं सुकविप्रबन्धम्।
स्तोत्रद्वयं चार्थविशेषयुक्तं तस्माद्गृहीत्वा पुनराप पूर्णम्॥ ६१॥

पुनर्नियुक्तः स्वगुरोर्यतीशो मालाधराचार्यवरात्सुमेधाः।
शठारिसूक्तेः परकालसूक्तेरर्थं सहस्रस्य च सोऽप्यगृह्णात्॥ ६२॥

एवंविधोऽर्थोऽप्युचितो भवेदित्युक्तं क्वचित्तत्र यतीश्वरेण।
श्रुत्वा गुरुः पूर्णयुगाय चाह ताभ्यां च तेनाप्यभिनन्दितस्सः॥ ६३॥

एवं रहस्यार्थविशेषयुक्तं वेदान्तमाचार्यगणादधीत्य।
कूरेशवात्स्येशमुखैश्च शिष्यैरुवास रङ्गे मुदितो यतीशः॥ ६४॥

ततस्तदात्रेयनतार्तिहर्त्रा यतीशपादाम्बुरुहं प्रपन्नः।
पिल्लानभिख्यं स्वपितृष्वसुश्च श्रीशैलपूर्णस्य सुतं निवेद्य॥ ६५॥

आजानसद्वृत्तयतीशभक्तितत्सेवनेच्छाद्यपि तत्सुतस्य।
श्रीशैलपूर्णोक्तमपि ह्यवोचच्छ्रीवेङ्कटाद्रीशमिमं भजेति॥ ६६॥

तं वीक्ष्य बालं स तदैव सर्वमन्त्रान् सहार्थान् प्रणतार्तिहर्त्रे।
दिदेश तन्मङ्गलदिव्यदेहसंरक्षकोऽभूत्तत एव सोऽपि॥ ६७॥

ततः कदाचिद्विषयुक्तभिक्षां ज्ञात्वा यतीशस्त्रिदिनोपवासः।
निशम्य तत् द्वावपि पूर्णवर्यौ गोष्ठीपुरादापतुराशु रङ्गम्॥ ६८॥

प्रत्युद्गतं तं प्रणतं यतीशं त्वद्देहमानिप्रणतार्तिहर्त्री।
संशोधितां स्वीकुरु नित्यभिक्षामित्यूचतुस्तौ स तथाकरोच्च॥ ६९ ॥

गोविन्दभट्टान्तरशिक्षणार्थं स्वप्रेरिताश्चापुरथोचुरेवम्।
श्रीशैलपूर्णाङ्घ्रिसरोजभृङ्गो गोविन्दभट्टोऽभवदस्तलिङ्गः॥ ७० ॥

वेदार्थसंक्षेपमथो यतीशो वेदान्तसूत्रस्य च सारदीपौ।
भाष्यं च गीताविवृतिं च कृत्वा वात्स्येशमुख्येभ्य उपादिशच्च॥ ७१ ॥

अबाधितार्थैरनपायवाचां तद्व्याससूत्रस्य यथार्थभाष्यम्।
कृत्वा यतीन्द्रो धुरि यामुनार्यमनोरथं पूरितवान् स आद्यम्॥ ७२ ॥

ततः कदाचित्स हि रङ्गनायिकाश्रीरङ्गनाथावपि फाल्गुनोत्तरे।
मुदाभिषिक्तौ स तदा प्रपद्य तौ गद्यत्रयं चाप्यवदद्यतीश्वरः॥ ७३ ॥

भाष्यादिभिस्तत्त्वविदोऽथ गद्यैः श्रीशं प्रपन्नस्य तदेकवृत्तेः।
कैङ्कर्यमाप्रापणकार्यमाह नित्याभिधग्रन्थमुखाद्यतीशः॥ ७४ ॥

ततस्स्वशिष्यैर्बहुभिर्यतीशः काञ्चीपथाद्वेङ्कटशैलवर्यम्।
भक्त्या भजन् तद्बहुमानितस्सन् श्रीशैलपूर्णं प्रणतो गुरुं तम्॥ ७५ ॥

तद्वीक्षितस्सन् कमलानिवासं प्रपद्य तत्पूर्णवराद्यतीशः।
रामायणं तद्विविधैर्महार्थैस्संवत्सरं तत्र वसन्नगृह्णात्॥ ७६ ॥

पूर्णात्मजौ द्वावपि तन्नियुक्तौ यतीशमाश्रित्य समस्तमर्थम्।
अवापतुस्तत्र सुतं कनिष्ठं पूर्णोऽप्यदात्तद्बहुमानपात्रम्॥ ७७ ॥

पिल्लानभिख्यं स च तेन दत्तं गोविन्दभट्टं निजयाचितं च।
सङ्गृह्य हृष्टस्समवाप रङ्गं काञ्चीपथादेव यतीश्वरश्च॥ ७८ ॥

गोविन्दभट्टं च विरक्तमैक्ष्य यतिं तमेम्बारभिधं स चक्रे।
जातस्सुतो रङ्गपतेः प्रसादात्तत्कूरनाथस्य च साधुभट्टः॥ ७९ ॥

भट्टारकं तं च पराशराख्यं कृत्वा कृतं तेन सहस्रनाम्नाम्।
भाष्यं प्रतिष्ठाप्य च यामुनार्यमनोरथं पूरितवान् द्वितीयम्॥ ८० ॥

कदाचिदन्तर्मठमर्थचिन्तां कस्य प्रबन्धस्य चिदाचरन्तम्।
यतीश्वरं वीक्ष्य च पूर्णपुत्रस्तच्चिन्तितार्थो ह्ययमित्यवोचत्॥ ८१ ॥

तदीरितार्थं निजचिन्तितं तं श्रुत्वा यतीशोऽप्यतिविस्मितस्सन्।
नाथान्वयाद्वेद तथेति मत्वा मज्ज्ञानपुत्रेत्यभिषस्वजे तम्॥ ८२ ॥

रामानुजार्यस्य यतीश्वरस्य ज्ञानात्मजस्तस्य च पादुकेति।
ख्यातश्शठारेश्वरमप्रबन्धं व्याख्यातवांस्तं कुरुकेशवर्यः॥ ८३ ॥

पिल्लानभिख्यं कुरुकेश्वराख्यं कृत्वा तु तं तत्कृतषट्सहस्रम्।
भाष्यं प्रतिष्ठाप्य स यामुनार्यमनोरथं पूरितवांस्तृतीयम्॥ ८४ ॥

यतीश्वरस्याप्यथ यज्ञमूर्तेर्जितो भवेद्यो जयतो मतस्थः।
इति प्रतिज्ञाय च रङ्गपुर्यां प्रावर्ततष्टादशरात्रवादः॥ ८५ ॥

स्वप्ने यतीशो वरदेक्षितस्सन् मायामतस्थापकयज्ञमूर्तिम्।
वादेऽजयत्तं वरदाख्यया स्वं नामाप्यदात्सोऽपि तुतोष शिष्यः॥ ८६ ॥

ततो यतीशस्स दिशो विजेतुं शिष्यैरनेकैस्सह तत्र तत्र।
गत्वा विजित्यान्यमतं समस्तं सरस्वतीपीठमथाससाद॥ ८७ ॥

तद्भाष्यमादाय निधाय मूर्ध्नि श्रीभाष्यमेतद्वरभाष्यकृत्त्वम्।
इतीव तस्मै प्रददौ च देवी भाष्यं हयग्रीवमपि स्वदेवम्॥ ८८ ॥

गृह्णन् हयग्रीवमपि प्रणम्य कुलागतं तं वरदं च नित्यम्।
आराधयन्नन्यमतानि जित्वा श्रीवेङ्कटाद्रिं पुनराससाद॥ ८९ ॥

भक्तात्ततल्लक्षणशङ्खचक्रः श्रीश्रीनिवासश्शिव एव नान्यः।
इतीव शैवै रचिते विवादे तत्प्रत्ययं प्राह यतीश्वरोऽपि॥ ९० ॥

निश्चित्य सर्वेऽप्यथ शङ्खचक्रे शूलं च निक्षिप्य तदालयान्तः।
कवाटमाबध्य ततः प्रभाते उद्घाटय सर्वे ददृशुस्सहैव॥ ९१ ॥

भङ्क्त्वा त्रिशूलं धृतशङ्खचक्रं श्रीश्रीनिवासं च समीक्ष्य शैवाः।
प्रधाविताश्चाशु यतीश्वरेण श्रीशैलपूर्णोऽपि तुतोष भूरि॥ ९२ ॥

ततो यतीशो गुरुवीक्षितस्सन् श्रीरङ्गमागम्य समस्तशिष्यैः।
वेदान्तसिद्धान्तविचक्षणोऽभून्मतान्तरस्थाश्च ततः कृतेर्ष्याः॥ ९३॥

दुर्बोधितश्चोलनृपोऽथ साधून् शिवात्परं नास्ति लिखेति पत्रे।
निर्बध्य चारैरपि तं यतीशमाहूतवांस्तद्विदितं च शिष्यैः॥ ९४॥

काषायधृत्कूरपतिस्त्रिदण्डी प्रायान्महापूर्णयुतस्तु तत्र।
वात्स्येशमुख्यैस्सहितो यतीशः शुक्लाम्बरः प्राप दिशं प्रतीचीम्॥ ९५॥

तत्र क्वचित् कैश्चन शिष्यभूतैः क्वाषायदण्डादि समर्पितं सः।
शास्त्रोक्तमार्गेण पुनः प्रगृह्य यथाक्रमाराधनतत्परोऽभूत्॥ ९६॥

यतीश्वरं तत्र नृपश्च कश्चित् केचिद्द्विजाग्र्याश्च समाश्रितास्तम्।
निष्पिष्टदेहा अपि जैनवर्गा महान् प्रभावः प्रकटीकृतश्च॥ ९७॥

नारायणः स्वप्नगतो यतीशं श्रीयादवाद्राविह भूतलान्तः।
वर्ते प्रतिष्ठापय मां मृदञ्च श्वेतां गृहाणेत्यवदत्स तत्र॥ ९८॥

ततो यतीशः सहसा प्रहृष्टः कल्याणतीर्थेष्ववगाह्य शुद्धः।
तदङ्कसंशोधितसद्विमाने चक्रे स नारायणसुप्रतिष्ठाम्॥ ९९॥

श्वेतां मृदं शिष्ययुतः प्रगृह्य धृत्वाथ रामप्रियविग्रहं तम्।
अन्विष्य डिल्लीशसुतागृहस्थं सम्पत्सुतागच्छ ममेत्यवोचत्॥ १००॥

तमागतं रामहितं स नीत्वा प्रीत्या स नारायणमुत्सवाद्यैः।
सम्पूजयन् मोदमवाप तत्र डिल्लीशपुत्र्यन्तरधात्तमेत्य॥ १०१॥

पूर्णार्यकूरेश्वरनेत्रहानिं श्रुत्वा तदा क्लिष्टतरो यतीशः।
निशम्य कूरेशमरोगमाशु चोलं तथा दुर्मृतमाप हर्षम्॥ १०२॥

तीर्थं कल्याणमासीत्तदपि पुरवरं तच्च नारायणाख्यं
  श्रीशस्सम्पत्कुमारो यतिनृपतिजयस्थानमासीत्ततस्तत्।
किञ्च श्रीमान् यतीन्द्रः स्वपदगतजनश्रेयसे स्वीयमर्च्यं
  रूपं प्रादाच्च तस्माद्यतिगिरिरिति तद्यादवाद्रेस्तु नाम॥ १०३॥

नत्वा सम्पत्कुमारं यदुगिरिकमलायुक्तनारायणं तं
शिष्यानादिश्य तत्राप्यथ कतिपयसच्छिष्ययुक्तो यतीशः।
गत्वा श्रीरङ्गनाथं ससलिलनयनः प्राणमत्तं प्रहृष्ट-
स्तत्रत्यास्तं तदोचुश्शठपथनगिरामुत्सवं सन्निरुद्धम्॥ १०४॥

तत्र श्रीमान् यतीशः कमपि शठरिपुं सम्प्रतिष्ठाप्य तेन
श्रीरङ्गाधीश्वरस्याध्ययनमहमहर्विंशतिं कारयित्वा।
पश्चात्कैश्चित्प्रबन्धैः स्वविषयककथं तं प्रबन्धं मिलित्वा
रङ्गे संश्राव्य चक्रे स तदितरमहासूरिगोदाप्रतिष्ठाम्॥ १०५॥

तद्वद्दिव्यस्थलेष्वप्यधिमहिमसु तत्सूरिगोदाप्रतिष्ठां
कृत्वा सर्वत्र तं चाध्ययनमहमपि प्राज्यहय्यङ्गवीनम्।
प्राज्यक्षीरोद्गुडान्नं वृषभगिरिपतिप्रीणनार्थं निवेद्य
श्रीमान् रामानुजार्यः कृतबहुमतिरप्यास गोदाकटाक्षैः॥ १०६॥

नीतं गोविन्दराजं रहसि निजतलाद्वेङ्कटाद्रेस्तु सानौ
संस्थाप्यार्चाश्शठारिप्रभृतिगुरुततेश्शिष्यसङ्घैर्यतीशः।
गत्वा रङ्गं स पश्चादितरमतजनान् स्वाश्रयानेव कुर्वन्
शिष्यान् कांश्चिद्विभज्य क्रमत इह तदा विज्वरस्सन्तुतोष॥ १०७॥

पीठाधीशांश्च कांश्चिच्चतुरधिगणनायुक्तसप्तत्यभिख्यान्
तत्राप्यग्र्यांश्च कांश्चिच्चतुर इह तथा भाष्यसिंहासनेशान्।
तत्र ज्ञानात्मजं तं तदुभयनिगमान्ताग्र्यभाष्येश्वरं च
श्रीमान् रामानुजार्यो यतिनृपतिमहादेशिकेन्द्रश्चकार॥ १०८॥

सप्तत्या तैश्चतुर्भिर्यतिभिरपि तथा सप्तशत्याद्भुतश्रीः
अन्यैरेकान्तिभिश्च द्वियुतदशमितैस्तैस्सहस्रैस्समेतः।
ज्येष्ठान् कूरेशमुख्याननुजमपि तथा चौरसं ज्ञानपुत्रं
वीक्ष्य व्याप्यत्ववाहान् यतिनृपतिरपि प्रेक्ष्य सम्मोदमाप॥ १०९॥

शास्त्राचारैकवश्यैर्विदितसुचरितैश्शिष्यवर्गैस्समेतः
कैश्चित्संप्रार्थितस्सन् यतिपतिरपि चालिङ्ग्य सद्विग्रहांस्त्रीन्।

श्रीरङ्गे भूतपुर्यामपि च यदुगिरौ स्थाप्यमेतत्त्रयं चेत्-
युक्त्वा दत्त्वा च तेभ्यो जगदखिलमवन्मां कटाक्षैस्स पायात्॥ ११० ॥

सर्वत्रोत्सार्य भूम्यां व्यपगतवसतिं मामकार्षीर्यतस्त्वं
तस्मात्संप्राप्तकाले मतमपि भवतः क्षोभयिष्ये शपेयम्।
श्रुत्वेप्युक्तिं कलेरप्यथ यतिनृपतिः श्रीशमाद्यं प्रपन्नो
जीयादव्याहतं मे मतमिति च वदन् पालयेन्मां कटाक्षैः॥ १११ ॥

जीयाच्छ्रीयामुनार्यैस्तदुपचितमहापूर्णगोष्ठीपुरोद्य-
त्पूर्णश्रीशैलपूर्णैरपि महिमनिधी रङ्गमालाधरार्यैः।
प्राचीनाराधनं तं वरदमपि हयग्रीवमाप्तं च वाण्या
दत्वा ज्ञानात्मजाय त्रिभुवनतिलकीभूतकीर्तिर्यतीशः॥ ११२ ॥

कांश्चित्कस्मिंश्चिदर्थे प्रतिनियततया सन्नियोज्यान्तरङ्गान्
तत्र क्षीरार्थकृत्ये प्रतिनियतमहो दासमप्यत्यनर्हम्।
कुर्वन् श्रीमान् यतीशः स्वपदविनततद्दासदासानुसादं
मामप्यत्यन्तभक्तं स्वहितमिव सदा गोपयन् सोऽपि जीयात्॥ ११३ ॥

कमलेशमुख्यगुरुपङ्क्तिवैभवप्रतिकर्मशोभि यतिराजवैभवम्।
य इदं पठन्ति कलिकल्मषापहं त इमे विभूतियुगनायका ध्रुवम्॥ ११४ ॥

॥ इति श्रीयतिराजवैभवं संपूर्णम् ॥

www.prapatti.com